# ॥ શ્રીગોપાલશતનામસ્તોત્રમ્ ॥

.. shrIgopAlashatanAmastotram ..

sanskritdocuments.org

August 20, 2017

.. shrIgopAlashatanAmastotram ..

# ॥ શ્રીગોપાલશતનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : shrIgopAlashatanAmastotram

File name : gopAlashatanAmastotram.itx

Category : aShTottarashatanAma, vishhnu

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીગોપાલશતનામસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

પાર્વત્યુવાચ
દેવદેવ મહાદેવ સર્વવાઞ્છાપ્રપૂરક ।
પુરા પ્રિયં દેવદેવ કૃષ્ણસ્ય પરમાદ્ભુતમ્ ॥ ૧॥

નામ્નાં શતં સમાસેન કથાયામીતિ સૂચિતમ્ ।
શ્રીભગવાનુવાચ ।
શૃણુ પ્રાણપ્રિયે દેવિ ગોપનાદતિગોપિતમ્ ॥ ૨॥

મમ પ્રાણસ્વરૂપં ચ તવ સ્નેહાત્પ્રકાશ્યતે ।
યસ્યૈકવારં પઠનાત્સર્વયજ્ઞફલં લભેત્ ॥ ૩॥

મોહનસ્તમ્ભનાકર્ષપઠનાજ્જાયતે નૃણામ્ ।
સ મુક્તઃ સર્વપાપેભ્યો યસ્ય સ્મરણમાત્રતઃ ॥ ૪॥

સ્વયમાયાન્તિ તસ્યૈવ નિશ્ચલાઃ સર્વસમ્પદઃ ।
રાજાનો દાસતાં યાન્તિ વહ્નયો યાન્તિ શીતતામ્ ॥ ૫॥

જલસ્તમ્ભં રિપુસ્તમ્ભં શત્રૂણાં વઞ્ચનં તથા ।
ૐઅસ્ય શ્રીગોપાલશતનામસ્તોત્રસ્ય નારદઋષિઃ અનુષ્ટુપ્ છન્દઃ
શ્રીગોપાલઃ પરમાત્મા દેવતા । શ્રીગોપાલપ્રીત્યર્થે શતનામપાઠે વિનિયોગઃ।
ૐગોપાલો ગોપતિર્ગોપ્તા ગોવિન્દો ગોકુલપ્રિયઃ ।
ગમ્ભીરો ગગનો ગોપીપ્રાણભૃત્ પ્રાણધારકઃ ॥ ૬॥

પતિતાનન્દનો નન્દી નન્દીશઃ કંસસૂદનઃ ।
નારાયણો નરત્રાતા નરકાર્ણવતારકઃ ॥ ૭॥

નવનીતપ્રિયો નેતા નવીનઘનસુન્દરઃ ।
નવબાલકવાત્સલ્યો લલિતાનન્દતત્પરઃ ॥ ૮॥

પુરુષાર્થપ્રદઃ પ્રેમપ્રવીણઃ પરમાકૃતિઃ ।
કરુણઃ કરુણાનાથઃ કૈવલ્યસુખદાયકઃ ॥ ૯॥

કદમ્બકુસુમાવેશી કદમ્બવનમન્દિરઃ ।
કાદમ્બીવિમદામોદઘૂર્ણલોચનપઙ્કજઃ ॥ ૧૦॥

કામી કાન્તકલાનન્દી કાન્તઃ કામનિધિઃ કવિઃ ।
કૌમોદકી ગદાપાણિઃ કવીન્દ્રો ગતિમાન્ હરઃ ॥ ૧૧॥

કમલેશઃ કલાનાથઃ કૈવલ્યઃ સુખસાગરઃ ।
કેશવઃ કેશિહા કેશઃ કલિકલ્મષનાશનઃ ॥ ૧૨॥

કૃપાલુઃ કરુણાસેવી કૃપોન્મીલિતલોચનઃ ।
સ્વચ્છન્દઃ સુન્દરઃ સુન્દઃ સુરવૃન્દનિષેવિતઃ ॥ ૧૩॥

સર્વજ્ઞઃ સર્વદો દાતા સર્વપાપવિનાશનઃ ।
સર્વાહ્લાદકરઃ સર્વઃ સર્વવેદવિદાં પ્રભુઃ ॥ ૧૪॥

વેદાન્તવેદ્યો વેદાત્મા વેદપ્રાણકરો વિભુઃ ।
વિશ્વાત્મા વિશ્વવિદ્વિશ્વપ્રાણદો વિશ્વવન્દિતઃ ॥ ૧૫॥

વિશ્વેશઃ શમનસ્ત્રાતા વિશ્વેશ્વરસુખપ્રદઃ ।
વિશ્વદો વિશ્વહારી ચ પૂરકઃ કરુણાનિધિઃ ॥ ૧૬॥

ધનેશો ધનદો ધન્વી ધીરો ધીરજનપ્રિયઃ ।
ધરાસુખપ્રદો ધાતા દુર્ધરાન્તકરો ધરઃ ॥ ૧૭॥

રમાનાથો રમાનન્દો રસજ્ઞો હૃદયાસ્પદઃ ।
રસિકો રાસદો રાસી રાસાનન્દકરો રસઃ ॥ ૧૮॥

રાધિકાઽઽરાધિતો રાધાપ્રાણેશઃ પ્રેમસાગરઃ ।
નામ્નાં શતં સમાસેન તવ સ્નેહાત્પ્રકાશિતમ્ ॥ ૧૯॥

અપ્રકાશ્યમયં મન્ત્રો ગોપનીયઃ પ્રયત્નતઃ ।
યસ્ય તસ્યૈકપઠનાત્સર્વવિદ્યાનિધિર્ભવેત્ ॥ ૨૦॥

પૂજયિત્વા દયાનાથં તતઃ સ્તોત્રમુદીરયેત્ ।
પઠનાદ્દેવદેવેશિ ભોગમુક્તફલં લભેત્ ॥ ૨૧॥

સર્વપાપવિનિર્મુક્તઃ સર્વદેવાધિપો ભવેત્ ।
જપલક્ષેણ સિદ્ધં સ્યાત્સત્યં સત્યં ન સંશયઃ ।
કિમુક્તેનૈવ બહુના વિષ્ણુતુલ્યો ભવેન્નરઃ ॥ ૨૨॥

ઇતિ શ્રીહરગૌરીસંવાદે શ્રીગોપાલશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIgopAlashatanAmastotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*